International Journal of Sanskrit Research 2021; 7(5): 11-13

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 11-13
© 2021 IJSR
www.anantaajournal.com
Received: 09-05-2021
Accepted: 12-06-2021

**चन्दन दत्तः**
SACT अध्यापकः, संस्कृत विभागः यतीन्द्रराजेन्द्र महाविद्यालयः, मुर्शिदावादः, पश्चिमवङ्गः, भारतस्य

**Corresponding Author:**
**चन्दन दत्तः**
SACT अध्यापकः, संस्कृत विभागः यतीन्द्रराजेन्द्र महाविद्यालयः, मुर्शिदावादः, पश्चिमवङ्गः, भारतस्य

# पञ्चतन्त्रम् : शिशुमनस्तत्त्वम् नैतिकता च

**चन्दन दत्तः**

## प्रस्तावना

संस्कृतसाहित्ये तथा विश्वसाहित्ये भारतीयकथासाहित्यस्य परमोत्कृष्टस्थानं वर्तते । तस्मात् कारणात् भारतीयकथासाहित्यं विश्वसाहित्यस्य जनकः इत्यपि कथ्यते। कथां प्रति मनुष्यस्य प्रवृत्ति आजन्मात् दृश्यते। तस्मात् प्रवृत्तात् कथासाहित्यस्य उद्भवमभवत्। कथासाहित्यं कथाकाव्यं वा संस्कृतगद्यकाव्यस्य भेदः वर्तते। अग्निपुराणे उक्तम्-

> आख्यायिका कथा खण्डकथा परिकथा तथा।
> कथालिकेति मन्यन्ते गद्यकाव्यञ्च पञ्चधा।।
> (अग्नि.पु.- अध्याय ३३७.९)

परवर्तिकाले अधिकांशालंकारिकाः मुख्यतः गद्यकाव्यस्य भागद्वयं स्वीकुर्वन्ति। यथा- कथा-आख्यायिका चेति।[i] कथासाहित्यस्य उद्भवस्य त्रीणी कारणानि सन्ति। यथा –

१. अवसरयापनम्
२. चित्तविनोदनम्
३. नीतिशिक्षादानम्

अधिकांशभारतीयकथासाहित्ये जलचर-नभचर-पशु-पक्षिनामभिः कथा एव दृश्यन्ते। परिवेशस्य आजन्म-परिचिताः पशु-पक्षिणः शिशुहृदये सुमहग-प्रभावं विस्तारयति इति कोऽपि सन्देहः नास्ति। पशु-पक्षिणां दैत्यदानवानाञ्च उपाख्यानं श्रुत्वा शिशुहृदयमानन्दितं मुग्धञ्च भवति। कथन भङ्गिमा एव कथाश्रवणं प्रति आकर्षणं चिरन्तम्। तेषां मनसि कथाख्यानं मायाजालं सृजति। कथायां रूपकाश्रयेण च नीतिमूलकमुपदेशं परिवेशितम्। संस्कृतसाहित्यस्य परिषरे भारतीयकथायाः अनेकाः ग्रन्थाः समुपलभ्यन्ते। तन्मध्ये पञ्चतन्त्रं नाम समहिमा विराजितम्। अस्माकं जीवनयापनस्य प्रात्याहिकता पञ्चतन्त्रे विस्मृता। शिक्षाक्षेत्रे पञ्चतन्त्रस्य प्रभावमनस्वाकार्यम्। शिशृहृदयं प्रतिक्षणं परिवर्तनं भवति। शास्त्रस्य तेषां शिशुहृदयं न आकर्षयति। शिशुसाहित्यस्य प्राक्-प्रयोजनं यथा वर्तमानजीवनस्य कठीरात् परिसराग् मुक्तं कृत्वा मातृस्नेहवत् कोमलस्पर्शेण तेषां ज्ञानलाभस्य पन्थानिर्देशनम्। कथाच्छलेन शिशुभ्यः नैतिक-धार्मिक-व्यवहारिक शिक्षाप्रदानं संस्कृतसाहित्ये तथा विश्वसाहित्ये अनवद्यम्। विद्वत्समाजे पञ्चतन्त्रस्य महिमानं वर्धयति एव। अतः समग्रविश्वे पञ्चतन्त्रं सादरेण गृहीतम्।

ध्रुपदी-संस्कृते पञ्चतन्त्रस्यैकस्यैकं गुरुत्वपूर्णस्थानमस्ति। नीतिशास्त्ररूपेण पञ्चतन्त्रं परिचितं भवति। एतत् ग्रन्थं विष्णुशर्मा विरचयति। ग्रन्थस्य कथामुखे ग्रन्थकारेनोक्तम् – दाक्षिणात्ये महिलारोप्यं नाम नगरमासीत्। तत्र अमरशक्तिनामकस्य राज्ञः त्रयः पुत्राः सर्वथा मुर्खाः सन्ति। तेषां नामानि यथा– वसुशक्तिः उग्रशक्तिः अनेकशक्तिश्चेति(पञ्चतन्त्रम्-पृष्ठा ३-४)। पण्डितः विष्णुशर्मा तेभ्यः शिक्षादानाय 'पञ्चतन्त्रम्' रचयति स्म।[ii] शिक्षादानेन सह चेषां नैतिकस्तरस्य उन्नयेनमपि पञ्चतन्त्रस्य कथायां समाजस्य वस्तुगतमुदाहरणं गृहित्वा पशु-पक्षिणामुपरि मनुष्यगुणमारोपित्वा शिशुनां यतते विष्णुर्शमा। एतमेव 'शिखन-शिक्षण' पद्धतिं तस्या कौशलञ्च विष्णुशर्मणा अस्माकमज्ञानन्तोरपि प्रदर्शयति स्म। सः प्रात्यहिक-जीवनस्य उदाहरणयोगेनाख्यानं रचयित्वा सः शिशुनां मनोयोगमाकर्षयितुम् अभिनवकौशलमचिन्तयतिति विष्णुर्शमा मनोविदासीतिति नास्ति सन्देहः।

'पञ्चतन्त्रम्' इति ग्रन्थे पञ्च तन्त्रानि सन्ति। यथा – मित्रभेदः, मित्रप्राप्तिः, काकोलूकीयम् (सन्धिविग्रहः), लव्धप्रनाशः, अपरीक्षितकारकञ्च। अध्यायविभाजनम् अपि अतिकौशलेन कृतः यतो हि शिशुनां हृदयग्राही तन्त्रविभागं तेन कृतम्। शिशुनां मनसि आकर्षनाय मित्रस्य प्राप्तिः मित्रस्य नाशः इत्यादिकं सुमनोहरं तन्त्रविभागं कृतम्। मित्रभेदादि तन्त्रान्तर्गतकथामाध्यमेन विष्णुशर्मा अनेके उत्तमांशा प्रकटितवान्। तत्र वर्णित प्रत्येककथाऽपि अधुना समाजे कथं व्यवहारः करणीयः इत्यस्मिन् विषये समालोचयति। सुविशाला वैदिकसाहित्येऽपि विभिन्ना कथाः सन्ति। [iii] किन्तु पशु-पक्षिणां मध्ये मनुष्य गुणावलीमारोपिपियित्वा सः पञ्चतन्त्रे प्रज्ञाशिक्षकस्य परिचयं प्रदत्तवान्। वैदिकसाहित्ये कथोपकथनमूलकसूक्तेऽपि(यथा-सरमा-पणि, ऋग्वेद-१०/१०८)। सरमारूपिणी कुक्कुरमातु कथा वर्णितास्ति। किन्तु जटिलशद्ब-प्रयोगेन शिशुमनः तया कथया अभिभूतं न भवति। महाभारतेऽपि पशु-पक्षिणां सम्पर्कितानि आख्यानि सन्ति। वौद्धसाहित्येऽपि कथाकथनं सुप्राचीनकालानादेव प्रचलितम्। परवर्तिकालेनापि पञ्चतन्त्रस्यानुकरणेन एकाधिकाख्यानि रचितानि। किन्तु कथासाहित्ये पञ्चतन्त्रस्य स्थानं स्वतन्त्रम्। न केवलं भारतवर्षेषु पाश्चात्येऽपि पञ्चतन्त्रस्य स्थानं स्वमहिम्ना प्रकाशितं भवति। हार्टलमहोदयस्य समीक्षायां ज्ञातं यत् पञ्चतन्त्रं पञ्चशताधिकं संस्कारेण प्रकाशितं भवति।[iv] अनेन पञ्चतन्त्रस्य जनप्रियता एव सूचिता।

शिक्षाया सह मनोयोगस्य सम्पर्कमतिनिविडम्। शिक्षणशिखनस्य प्रथमं शिक्षार्थीनां मनोयोगाकर्षणं भवति। शैशवकाले मनोयोगस्य निरपेक्षं प्राधान्यमस्ति। शिक्षनीयविषयानां करणीयकार्यानाञ्च मध्ये सादृश्यं सायुज्यञ्च स्थापयित्वा शिशुशिक्षार्थीनां मनोयोगमाकर्षयितव्यमिति तत्त्वं पुराकाले विष्णुशर्मा यथार्थेन अनुभवति स्म। तर्हि सः पशुपक्षिणां मध्ये मनुष्य चरित्रमारोपयित्वा शिशुमनांसि आकर्षणं करोति। सः केवलमुपदेशेन ज्ञानमुपदत्वा सुकौशलेन शिशुशिक्षायाः उपस्थापयति स्म। एतेन सः प्राचीनपद्धतिं परित्याज्य अभिनवपद्धतिमवलम्वसति स्म। सः वेद-पुराणं गतानुगतिकमनुकरणं त्याक्त्वा संस्कृतसाहित्ये प्रवर्तनं कृतवान्।

मनुष्यः समाजवद्धः जीवः। तर्हि तस्य समाजं प्रति मौलिककर्तव्यानि सन्ति। अस्माकं कर्तव्यविषये यदि वयं शिशुनवगतं न कुर्मः तर्हि ते समाजे आदर्शपुरुषरूपेण न प्रतिष्ठां लभिष्यन्ति। शिशुशिक्षायाः एतत् कौशलं चिन्तयित्वा पण्डितः विष्णुशर्मा 'पञ्चतन्त्रम्' रचयति। आधुनिककालेऽपि दूरदर्शनस्य विभिन्नानि क्षेत्रानि पञ्चतन्त्रस्यानुकरणेन शिशुमनोहरणस्य विविधरूपेणायोजनं कुर्वन्ति। किन्तु तानि शिक्षाया उद्देश्यं वर्जयित्वा हास्यकौतुकरूपेणाधिकानि प्रसिद्धानि भवन्ति। तर्हि अद्य पितरो शिशुनादिशति-दूरदर्शं पठतु इति। मातुः पितुश्च एवंविधातादेशात् एतदेव स्पष्टं यत् आधुनिकव्यङ्गचित्रानि मूलोद्देश्यात् प्रतिष्ठानि। आधुनिकशिक्षाव्यवस्थायां श्रेण्यामनुग्रसर छात्रान् प्रति विशेषदृष्टिनिक्षेपनं कर्तव्यरूपेण निर्दिष्टम्। यथासम्भवं तेभ्यः विशेषशिक्षाव्यवस्था ग्रहणीया। पण्डितः विष्णुशर्मा आधुनिकस्य मनोविज्ञानस्य एतत् चिन्तनं सुप्राचीनकाले चिन्तितवान्। तर्हि सः महिलारोप्यनगरस्यनृपतेः अमरशक्तेः मुर्खपुत्रेभ्यः शिक्षादानाय कथाछलेन शिक्षादानस्यैतत् कौशलं चिन्तितवान् । विष्णुशर्मणः एतत् चिन्तनं मनोविदरूपेण तस्य परिचयं परिस्थापयति आधुनिककाले एकाधिकमनोविज्ञानिना दृश्य-श्रव्योपकरणस्य प्रयोगं कृतम्। अतः पण्डितः विष्णुशर्मा शिशुशिक्षणविषये आधुनिकमनोविज्ञानीनां पथप्रदर्शकरूपेण समादरणीय इति कथितुं युज्यते।

मनुष्यस्य जीवने शिक्षायाः प्रयोजनं तान् सामाजिकजीवरूपेण सार्थकतायां सम्माने च। किन्तु पशुपक्षिणां मध्ये एतादृशशिक्षणस्य प्रयोजनं नास्ति। पशुपक्षी प्रकृत्यां सरलेन जीवनधारणं करोति। शिशुनां मनसि अपि पशुपक्षितुल्यानि कोमलानि सरलानि च। तर्हि ते समाजस्य नियमलङ्घनमिच्छन्ति। तर्हि कथासाहित्यिकः सुपरिकल्पितरूपेण तेषां मध्ये मनुष्यसुलभगुणं वर्धयितुमुपदेशं ददाति। पण्डितः विष्णुशर्मा सहस्रवर्षानि पूर्वे एतत् सत्यमुपलव्धवान्। यदि आधुनिकशिक्षाविदगणाः विष्णुशर्मणः अनुसरणं कुर्वन्ति तर्हि शिशुशिक्षायाः प्रकृतमुद्देश्यपूरणं भविष्यति इति नास्ति कश्चित् सन्देहः।

**परिशीलिता ग्रन्थाः –**

1. दास. ड. देवकुमार, संस्कृत साहित्येर इतिहास, १४१९, सदेश, श्रीवलराम प्रकाशनी, कोलकाता।
2. शास्त्री. आचार्य. गुरुप्रसाद, पञ्चतन्त्रम् (अभिनवराजलक्ष्मी संस्कृत-हिन्दीटीका सहित), २०१८, चौखाम्वा सुरभारती प्रकाशन, वाराणसी।
3. मिश्र. आचार्य. श्रीरामचन्द्र, काव्यादर्श, १९९८, चौखाम्वा विद्याभवन, वाराणसी।
4. मुखोपाध्याय. अध्यापक.ड.गोपेन्दु, संस्कृत साहित्येर इतिवृत्त, १४१९, इउनाइटेड वुक एजेन्सि, कलकाता।
5. वन्द्योपाध्याय. धीरेन्द्रनाथ, संस्कृत साहित्येर इतिहास, २००९, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलकाता।
6. डा. देशराज, विश्व पटल पर संस्कृत साहित्य, २०२०, विद्यानिधि प्रकाशन, दिल्ली।

---

[i] गद्यं तु गदितं द्वेधा कथा चाख्यायिकेति च।(काव्यादर्श-१.२९)

[ii] एतद् पञ्चतन्त्रकं नाम नीतिसारं वालावोधनार्थं भूतले प्रवृत्तम्।(पञ्चतन्त्रम्,कथामुखम्)

[iii] ऋग्वेद. ७.१०३,ऐतरेयब्राह्मण ७.१३-१८,छान्दोग्योपनिषद् १.१२,४.१.५,७।

[iv] संस्कृत साहित्येर इतिहास,पृष्ठा-४६१